M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 774

Title : Kushmandi Vrata

774

कुश्मांडी व्रतम्

Kushmandi Vrata	Title
	Author
	Editor
	Year, Vols.
	Publisher
774	Remarks

श्रीगणेशायनमः ॥ अथकूष्मांडीव्रतं ॥ आचम्यप्राणानायम्यदेश
कालौस्मृत्वाममेहजन्मनिजन्मांतरे अनवछिन्नसंततिवृद्धियावज्जी
वमखंडितसौभाग्य धनधान्य पश्वादिसंपत्तिप्राप्त्य
र्थं कूष्मांडीव्रतोद्यापनाख्यंकर्मकरिष्ये ॥ तदंगगणपत्यादिनांदीश्रा
द्धं च कुर्यात् ॥ आचार्यंवृणुयात् ॥ सर्वतोभद्रादिदेवताःस्थाप्य कल
शेसावित्रीसहितब्रह्माणंस्थाप्य कू१४श्मांडीस्तनयेत् ॥ कूश्मांडीब्रह्म
देवत्यांब्रह्मणानिर्मितांपुरा ॥ तामहंपूजयिष्यामिममकामसुसि
द्धये ॥ प्रणोदेवीसर० इतिप्रजार्थंमंत्रः ॥ रात्रौकथाश्रवणादिनाजा
गरणंकुर्यात् ॥ प्रभातेस्नात्वाहोमंकुर्यात् ॥ ब्रह्मजज्ञानमितिचं
ब्रह्माणंघृताक्ततिलैः शतमष्टोत्तरंसावित्रीप्रणोदेवीतिमंत्रे

ऋषमांडिव्रत
१ पापन
कथा

पतैनैव द्रव्येण तत्तं रव्ययात्मंडलं देवता अब्ज्येनैकैकयागुरु
यात्‍ पुष्पः संपूज्य आचार्यमपि संपूज्य त्वासकलशपीठाद्य
खीं आचार्याय दद्यात्‌ तत्र मंत्रः ऋषमंडी ब्रह्मदेवस्यां ब्रह्मणानि
र्मितां पुरा तस्यादानेनमेसर्वे पूर्णाः पूर्णाः संतु मनोरथाः १ ए
नहस्ताद्दुष्पार्घ्यं गां दद्यात्‌ श्रेयः स्वीकरणादि विसर्जनांतं संपा
द्य परमेश्वरार्पणं कुर्यात्‌ अथ कथा सूत उवाच पुरा कै
लासशिखरे देवदेवं महेश्वरं पप्रच्छ पार्वती देवी लोकानां हित
काम्यया १ पार्वत्युवाच देवदेव जगन्नाथ प्रसन्नोसी यदीश्वर तदे
कं मे व्रतं ब्रूहि सर्वकामप्रदायकं २ पुत्रपौत्रप्रदं नृणां आयुरारोग्य
वर्धनं सर्वसंपत्करं चैव स्त्रीणां सौभाग्यदायकं ३ ईश्वर उवाच १

साधु साधु महाभागे यत्त्वं पृच्छसि वरानने एतदहं कथयिष्यामि व्रतानामु
त्तमव्रतं ४ अद्यापि परमं गुह्यं नाख्यातं कस्यचिन्मया मम प्राणस
मासि त्वं तत्ते कथयाम्यहं ५ पुरा मया ज्ञया ब्रह्मा ससर्ज भुवनत्र
यं तत्र लोकाननेकांश्च निर्ममे स चराचरं ६ मरीच्याद्याश्च ऋषयो
मुनयः सनकादयः सृष्टा अपि न ते शक्ताः प्रजाः सृष्टुं बभूविरे ७ त
ततः स चिंतयामास ब्रह्मा लोकपितामहः क उपायो विधेयो वै कथं वंश
स्थिर्भविष्यति ८ इत्थं संचिंत्य सुचिरं विधाना विदधे ततः मनुं स्वायं
भुवं चैव शतरूपां तथा स्त्रियं ९ ततस्तौ दंपती कृत्वा वचनं चेदमब्र
वीत्‌ युवां जनयतां लोकान् बहुशः प्रीतये मम १० ईश्वर उवाच

कू. कथा. तामनुश्रुत्य हा कांशा तमपुत्ता समान्वितः येन व्रतेन चीर्णेन संतान
मे भविष्यति प्रणिपत्य विधातारमुवाच प्रणयान्वितः ११ मनुरु
२ वाच भगवन्सर्वलोकेश व्रतमेकं वदस्व मे येन व्रतेन चीर्णेन संत
तिर्मे भविष्यति १२ साम्राज्यं च यशो भक्तमायुरारोग्यमेव च प्रसा
दं कुरु मे देव करिष्यामि त्वया ॰ दितं १३ ईश्वरः निशम्य
वचनं वै धाम नो स्वायंभुवस्य तव मुहूर्तमात्रं संचिंत्य मनुमेतदुवाच ह
१४ ब्रह्मा इदं बीजं च ह्यात्र संकुश्मांड्याः शोभने स्थले आरोग्य
सं च यशः स्यात्सदा भार्यासमान्वितः १५ एतस्माद्वर्द्धवेद्धी कुश्मांडी रामना
मकामदा यत्नेन रक्षणीयासा यावत्स्वविवर्तनं भवेत् १६ सफलाम २

सं ह्य च गंधपुष्पाक्षतादिभिः ॥ धूपैर्दीपैश्च नैवेद्यैः ब्राह्मणाय समा
पयेत् १७ एवं कृते महाभाग सर्वसिद्धिर्भविष्यति ईश्वरः इति ब्र
ह्मवचः श्रुत्वा तथा कृतवान्मनुः १८ सभार्यः सकलान्कामानवा
प गिरिकन्यके प्रियव्रतोत्तानपादौ तस्य पुत्रौ बभूवतुः १९ की
र्तिमंतौ तयोर्वंश्याः पालिता ये वसुंधरा आकूतिर्देवहूतिश्च प्रसू
तिरिति कन्यकाः २० तिस्रस्तासां च संतत्या त्रिभुवनं ततं
एतत्ते कथितं कांते किमन्यच्छ्रोतुमिच्छसि २१ पार्वती यत्त्वया क
थितं देव कुश्मांड्याः शोभनस्थले उद्यापनविधिं तस्य कथयस्व
जगद्गुरो २२ कस्मिन्मासे च कर्त्तव्यं तद्व्रतं का च देवता के मंत्राः ह

कू॰ व्र॰ उ॰ जने प्रोक्ताः कथं होमो विधीयते॥२॥ अगस्त्ये रुपयादेवतुमर्हसि शंकर
३ ईश्वर उ॥ शृणु पार्वति वक्ष्यामि व्रतस्योद्यापनं विधिं॥ २३॥ कूष्मांड्याः
कामदायिन्याः नीलोत्पलविलोचने॥ ज्येष्ठे मासि सिते पक्षे शु
मुहूर्ते शुचिरुष्ठले॥ २४॥ कूश्मांडीं रोपयेत् कांते यत्नेन परिपालये
त्॥ ततो बहुफलां वल्लीं कूश्मांडीमवलोक्य च॥ २५॥ संप्राप्ते का
र्तिके मासि कुर्यादुद्यापनं नरः॥ उर्मेषु शुक्लचतुर्दश्यां दंतधावनपू
र्वकं॥ २६॥ प्रातः शुक्लतिलैः स्नात्वा नित्यकर्म समाचरेत्॥ उपोषितो
रात्रौ भक्त्या संभारानुपकल्पयेत्॥ २७॥ गणेशपूजनं कृत्वा स्वपितृ जयरा
पूज्य व्याहृतैः सह॥ आचार्यं वरयेत्प्राज्ञं शांतं दांतं तथा स्वनो॥ २८॥

मुखे सर्वतोभद्रमंडले तत्र देवताः॥ आवाहयेत्समीपे धान्यपुंजोपरि
न्यसेत् ३० नवीनं कलशं वस्त्रांपिधानेन समन्वितं सौवर्णं तत्र सावि
पात्रं हवणस्तथा ३१ प्रतिष्ठाप्यार्चयेद्भक्त्या षोडशोपचारकैः पौरुषेण
धस्त्रं तु मंत्रैः पौराणिकैरपि ३२ मंडले देवताः सर्वाः स्वतन्मंत्रैः प्रपूजयेत्
एवं संपूज्य विधिवत्पुराणपठनादिभिः ३३ महोत्सवं ततः कृत्वा कुर्याज्जागर
णं ततः प्रभाते विमले स्नात्वा होमं कुर्याद्यथाविधि ३४ अष्टोत्तरशतं कृत्वा तत्र
सुमंगलानामिन्त्रैश्च एन फलतितिलैर्द्रव्यैस्मनाद्देवीतिमंत्रतः ३५ आज्यैर्ने
कैकयाहुत्वा पश्चे मंडलदेवताः समाप्य होमशेषं पंचपुनः स्थानं समाचरेत् ३६
कूष्मांड्यास्त्वदेशे चतुःसौवर्णं फलसंयुतं कूष्मांडीं रजतेबद्धां भणोंदे
वीतमंत्रतः ३७ फलेस्वर्णविनिर्मितं पश्चात् यथाविधिं वस्त्रैराभ

कू॰ व्र॰ ४

श्चैव गंधपुष्पाक्षतादिभिः ॥ ३८ ॥ धूपैर्दीपैश्च नैवेद्यैः तांबूलफलसं
युतैः ॥ तत्तन्मयेत्परया भक्त्या यथाविभवसारतः ॥ ३९ ॥ आचार्यं
पूजयेत्पश्चाद्वस्त्रैर्दद्यात्सदक्षिणां ॥ कूश्मांडी ब्रह्मदैवत्या ब्रह्म
णा निर्मिता पुरा ॥ ४० ॥ तस्या दानेन मे सर्वे पूर्णाः संतु मनोरथाः ॥ कृत्वैवं
प्रतिमा युक्तमाचार्या[redacted]य निवेदयेत् ॥ ४१ ॥ गां च कांचनं दद्याद्वृत्तसंपू
र्णहेतवे ॥ ब्राह्मणान्भोजयेद्भक्त्या दक्षिणाभिश्च तोषयेत् ॥ ४२ ॥ ब्राह्म
णान्भोजयेत्पश्चाच्चतुर्विंशतिसंख्यया ॥ अथ वा द्वादश तेषां शक्त्या
दद्याच्च दक्षिणां ॥ ४३ ॥ आशिषश्च ततो ग्राह्या तैर्भुंजीत तदनुज्ञया ॥ एवं कृते रामन
तदेश नारी वा पुरुषोपि वा ॥ ४४ ॥ सर्वांश्च कामानाप्नोति नात्र कार्या वि
चारणा ॥ यद्दुःखं पृच्छथ त्वया गौरी कूश्मांडीव्रतमुत्तमम् ॥ ४५ ॥ सर्वक्लेशविनिर्मुक्तः ४

परमं सुखमाप्नुयात् ॥ सूतः ॥ इति शंभुवचः श्रुत्वा पार्वती जग
दंबिका ॥ ४६ ॥ संतोषं परमं प्राप विस्मयोत्फुल्ललोचना ॥ ४७ ॥ ७ ॥
इति श्रीस्कंदपुराणे उमामहेश्वरसंवादे कूश्मांडीव्रतकथासंपू
र्णम् ॥ ७ ॥ श्रीपरमेश्वरार्पणमस्तु ॥ ० ८ ॥ सौम्याब्दे मार्गशी
र्षे शुक्लप्रतिपदा सौम्यवार तद्दिने इदं पुस्तकं [redacted] पाडूवाडकेने
लिखितं शुभं भवतु गजाननार्पणमस्तु श्रीरस्तु

कुश्मांडी व्रतं

५

774

श्रीरस्तु इति कूश्मांडीव्रतकथा संपूर्णं गजाननार्पणमस्तु

[redacted] प्रहातवंश्यनामः